नियताभ्यान्देहातिरिक्तात्मानुमानम् । आत्यो जन्मान्तरगतकर्म्मानुष्ठाननियततया । तथा गमनागमनाभ्यां ज्ञानेच्छाप्रयत्नाधारनियताभ्यामपि भौतिकदेहातिरिक्तात्मानुमानम् । न हि देहस्य चैतन्यादि सम्भवति यतः कारणगुणप्रक्रमेण कार्य्यद्रव्ये वैशेषिकगुणारम्भोदृष्टः । न च तत्कारणभूतपार्थिवपरमाण्वादिषु चैतन्यादि समवायः सम्भवति तदारब्धस्तम्भकुम्भादिभौतिकेष्वनुपलम्भात् । न च मदशक्तिवदुदकादिद्रव्यान्तरसंयोगज इति वाच्यम् शक्तेःसाधारणगुणत्वादतो भौतिकदेहातिरिक्तश्चैतन्यादिसमवाय्यङ्गीकर्त्तव्यः । सत्यान्ते प्रसिद्धे । श्रेयो हितप्राप्तिः । सुखदुःखे आमुष्मिके । तथा शुभकर्म्मानुष्ठानमशुभकर्म्मपरित्यागः । एतैश्च ज्ञाननियतैर्देहातिरिक्तात्मानुमानम् । निमित्तं भूकम्पादि शकुनज्ञानम्पिङ्गलादिपतत्त्रिचेष्टालिङ्गकम् ज्ञानम् ग्रहाःसूर्य्यादयः तत्संयोगजैः फलैः । तारा अश्विन्यादिर्व्यतिरिक्तानि ज्योतींषि नक्षत्राण्यश्वयुक्प्रभृतीनि एतेषां सञ्चारैः शुभाशुभफलद्योतनैः । जागरैर्जागरावस्थाजन्यैश्च सच्छिद्रादित्यादिदर्शनैः । तथा स्वप्नजैः खरवराहयुक्तरथारोहणादिज्ञानैः । तथा आकाशाद्यैश्च जीवोपभोगार्थतया सृष्टैः । तथा मन्वन्तरप्राप्त्या युगान्तरप्राप्त्या देहेऽनुपपद्यमानया तथा मन्त्रौषधिफलैः प्रेक्षापूर्व्वकैः चुद्रकर्माद्यैः साक्षात्परम्परया वा देहेऽनुपपद्यमानैर्विद्यमानं हे मुनयो वित्त जानीत । किञ्च । "अहङ्कृतिः स्मृतिर्मेधा द्वेषोबुद्धिः सुखं धृतिः । इन्द्रियान्तरसञ्चार इच्छा धारणजीविते । स्वर्गः स्वप्नश्च भावनाप्रेरणं मनसागतिः । निमेषश्चेतना यत्न आदानम्पाञ्चभौतिकम् । यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः । तस्मादस्ति परोदेहादात्मा सर्वग ईश्वरः" या० । अहङ्कृतिः अहङ्कारः । स्मृतिः प्रागभवीयानुभवभावितसंस्कारोद्बोधनिबन्धना स्तन्यपानादिगोचरा । सुखमैहिकम् । धृतिर्धैर्य्यम् । इन्द्रियान्तरेण दृष्टेऽर्थे इन्द्रियान्तरस्य सञ्चारः यमहमद्राक्षन्तमहं स्पृशामीत्येवमनुसन्धानरूप इन्द्रियान्तरसञ्चारः । अत्रेच्छाप्रयत्नचैतन्यानां स्वरूपेण लिङ्गत्वम् । पूर्व्वश्लोकेऽनुगमनसत्यवचनादिहेतुतयार्थिकम् लिङ्गत्वमित्यपौनरुक्त्यम् । तथा धारणं शरीरस्य, जीवितं प्राणधारणम् । स्वर्गोनियतदेहान्तरोपभोग्यः सुखविशेषः । स्वप्नः प्रसिद्धः पूर्व्वश्लोके तु स्वप्नस्य शुभफलद्योतकतया लिङ्गत्वमत्र स्वरूपेणेत्यपौनरुक्त्यम् । भावानामिन्द्रियादीनाम्प्रेरणं मनसोगतिश्चेतनाधिष्ठानव्याप्ता । निमेषः प्रसिद्धः तथा पञ्चभूतानामुपादानम् । यस्मादेतानि लिङ्गानि भूतेष्वनुपपद्यमानानि साक्षात्परम्परया वात्मनोद्योतकानि दृश्यन्ते । तस्मादस्ति देहातिरिक्त आत्मा सर्वग ईश्वर इति सिद्धम्" इत्यन्तेन मिता० ।

देहात्मनोः स्वभावभेदपर्य्यालोचनयाऽपि न यथा तयोरैक्यं तथा दर्शितं विवेकचूड़ामणौ "देहोऽयमन्नभवनोऽन्नमयस्तु कोषश्चान्नेन जीवति विनश्यति तद्विहीनः । त्वक्चर्म्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्हति नित्यशुद्धः । पूर्व्वं जनेरपि मृतेरधुनायमस्ति जातक्षणः क्षणगुणोऽनियतस्वभावः । नैकोजडश्च घटवत्परिदृश्यमानः स्वात्मा कथं भवति भावविकारवेत्ता । पाणिपादादिमान् देहो नात्मा व्यङ्गेऽपि जीवनात् । तत्तच्छक्तेरनाशाच्च न नियम्योनियामकः । देहतद्धर्म्मतत्कर्म्मतदवस्थादिसाक्षिणः । स्वतएव स्वतः सिद्धं तद्वैलक्षण्यमात्मनः । शल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः । कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः । त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति । विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम् । देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवाविदुषस्त्वहंधीः । विवेकविज्ञानवतोमहात्मनो ब्रह्माहमित्येव मतिः सदात्मनि । अत्रात्मबुद्धिं त्यज मूढबुद्धे ! त्वङ्मांसमेदोस्थिपुरीषराशौ । सर्व्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शान्तिं परमां भजस्व । देहेन्द्रियादावसति भ्रमोदितां विद्वानहन्तां न जहाति यावत् । तावन्न तस्यास्ति विमुक्तिवार्त्ताप्यस्त्वेष वेदान्तनयान्तदर्शी । छायाशरीरे प्रतिबिम्बगात्रे यत्स्वप्नदेहे हृदि कल्पिताङ्गे । यथात्मबुद्धिस्तव नास्ति काचित् जीवच्छरीरे च तथैव मास्तु । देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य वीजम् । यतस्तस्त्वं जहि तां प्रयत्नात् त्यक्तेऽद्य चित्ते न पुनर्भवाशा" । आत्मस्वरूपमुक्तं विवेकचूड़ामणौ "अस्ति कश्चित् स्वयं नित्यमहंप्रत्ययलम्बनः । अवस्थात्रयसाक्षी सन् पञ्चकोषविलक्षणः । योविजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु । बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् । यः पश्यति स्वयं सर्व्वं यं न पश्यति कश्चन । यश्चेतयति बुद्ध्यादिं न तु यं चेतयत्ययम् । येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किञ्चन । आभारूपमिदं सर्वं यं भान्तमनुभात्य-